## प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च । (१६३/२८१७)

प्रेषणं प्रैषः । कामचाराभ्यनुज्ञानम् अतिसर्गः । [1]निमित्तभूतस्य कालस्यावसरः प्राप्तकालता । एतेष्वर्थेषु [2]धातोः कृत्यसञ्ज्ञकाः प्रत्ययाः भवन्ति, चकाराल् लोट् च[3] । भवता [4]कटः करणीयः, कर्तव्यः, कृत्यः, कार्यः । लोट् खल्वपि – करोतु कटं भवानिह प्रेषितः, [5]भवानतिसृष्टः, भवतः प्राप्तकालः कटकरणे[6] । किमर्थं प्रैषादिषु कृत्या विधीयन्ते [7]न सामान्येन, भावकर्मणोर्विहिता एव ते प्रैषादिष्वन्यत्र च भविष्यन्ति ? विशेषविहितेनानेन लोटा [8]बाध्यन्ते । वासरूपविधिना भविष्यन्ति ? एवं तर्हि[9] ज्ञापयति, स्त्र्यधिकारात् परेण वासरूपविधिर्नावश्यं [10]भवति इति । विधिप्रैषयोः को विशेष ? केचिदाहुः, अज्ञातज्ञापनं विधिः, प्रेषणं प्रैषः इति ॥

## लिङ् चोर्ध्वमौहूर्तिके । (१६४/२८१८)

प्रैषादयो वर्तन्ते । प्रैषादिषु गम्यमानेषु ऊर्ध्वमौहूर्तिके[11]ऽर्थे वर्तमानाद् धातोः लिङ् [12]प्रत्ययो भवति[13], चकाराद् यथाप्राप्तं च । ऊर्ध्वं मुहूर्तात्, उपरि मुहूर्तस्य भवता खलु कटः कर्तव्यः, करणीयः, [14]कार्यः । भवान् खलु कटं कुर्यात्, भवान् खलु[15] करोतु । भवानिह प्रेषितः । भवानतिसृष्टः । भवान् प्राप्तकालः[16] ॥

## स्मे लोट् । (१६५/२८१९)

प्रैषादिषु ऊर्ध्वमौहूर्तिके [17]इति वर्तते । स्मशब्दे उपपदे प्रैषादिषु गम्यमानेषूर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद् धातोः लोट् प्रत्ययो भवति । लिङकृत्यानामपवादः । ऊर्ध्वं मुहूर्ताद् भवान् कटं करोतु स्म, ग्रामं गच्छतु स्म, माणवकमध्यापयतु स्म ॥

## अधीष्टे च । (१६६/२८२०)

स्मे इति [18]वर्तते । अधीष्टं व्याख्यातम् । स्मशब्दे उपपदेऽधीष्टे गम्यमाने [19]धातोः लोट् प्रत्ययो भवति । [20]लिङोऽपवादः । अङ्ग स्म राजन् माणवकमध्यापय । अङ्ग स्म राजन्नग्निहोत्रं [21]जुहुधि ॥

## कालसमयवेलासु तुमुन् । (१६७/३१७९)

कालादिषु उपपदेषु धातोः तुमुन् प्रत्ययो भवति । [22]कालो भोक्तुम् । वेला भोक्तुम् । इह कस्मान्न भवति, 'कालः पचति भूतानि '[23] (मै. उ. ६.१५) इति ? प्रैषादिग्रहणमिहा[24]भिसम्बध्यते । इह

---

1. निमित्तकस्य फ. 2. गम्यमानेषु इत्यधिकम् अ. क. ह, धातोः नास्ति फ. ह. 3. भवति इत्यधिकम् फ. 4. खलु इत्यधिकम् फ. 5. भवानिहातिसृष्टः ह. 6. इति इत्यधिकम् फ. 7. न नास्ति फ. 8. न बाध्येरन् फ. 9. एतत् इत्यधिकम् क. फ. ह. 10. भावि अ.फ.ह. 11. अर्थे नास्ति ह. 12. प्रत्ययो नास्ति फ. 13. लोट् कृत्यानामपवादः इत्यधिकम् ह. 14. कृत्यः इत्यधिकम् फ. 15. कटं इत्यधिकम् फ. 16. कटकरणे इति इत्यधिकम् फ. 17. इति नास्ति फ, च सर्वमनुवर्तते ह. फ. 18. अनुवर्तते ग. 19. धातोः नास्ति फ. 20. अधीष्टलिङो फ. ह. 21. जुहुयात् ह. 22. समयो भोक्तुम् इत्यधिकम् फ. ह. 23. कालः संहरति प्रजाः इत्यधिकम् फ. 24. अनुवर्तते ह.